रज्जुभिः पीड़नम्। इति मनुः॥

कुड्मलः,पुं,क्ली,(कुटति ईषत् विकासोन्मुखीभवतीति। कुटि+"वृषादिभ्यश्चित्"। उणां १।१०८। इति कलच्।) विकासोन्मुखप्रौढ़कलिका। ईषद्विकसिता कलिका। तत्पर्य्यायः। मुकुलः २। इत्यमरः॥ कोषः ३। इति जटाधरः॥ (यथा, माघे।२।७। "द्योतितान्तः सभैः कुन्दकुड्मलाग्रदतः स्मितैः"॥)

कुठ छिदि। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कुठेरः कुठारः कुठाकुः। इति दुर्गादासः॥

कुठ इ खोटने। वैकल्ये। आलस्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्-इदित्।) पञ्चमस्वरी। कर्म्मणि इ कुण्ठ्यते। वैकल्यं विकलीभावः। आलस्यं मन्दीभावः। कुण्ठति खड्गः शोकार्त्तो जड़ो वा। इति दुर्गादासः॥

कुठः, पुं, (कुण्ठ्यते छिद्यतेऽसौ। कुठ छेदने+कर्म्मणि घञर्थे कः।) वृक्षः। इत्यमरः। २।४।५॥

कुठरः, पुं, (कुट+बाहुलकात् करन्।) मन्थानदण्डबन्धनार्थस्तम्भः। तत्पर्य्यायः। दण्डविष्कम्भः २। इत्यमरः। २।९।७४॥ (नागविशेषः। (यथा, महाभारते १।३५।१५।
"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः"॥

कुठाकुः, पुं, (कोठति आहन्ति भिनत्ति काष्ठम्। कुठ छेदने+आकुन् किच्च।) पक्षिविशेषः। इत्युणादिकोषः। काठ्ठोक्रा इति भाषा॥

कुठाटङ्कः,पुं स्त्री, (कुठारष्टङ्क इव। पृषोदरादित्वात् रलोपे साधुः।) कुठारः। इति जटाधरः॥

कुठारः, पुं स्त्री, (कोठतीत्यनेन। कुठ+करणे आरन्।) अस्त्रविशेषः। कुड़ाल इति भाषा। तत्पर्य्यायः। स्वधितिः २ परशुः ३ परश्वधः ४। इत्यमरः। २।८।९२॥ कुठारी ५ पर्शुः ६ परस्वधः ७ पर्श्वधः ८। इति तट्टीका॥ कुठाटङ्कः ९ द्रुघणः १०। इति जटाधरः॥ (यथा, श्रीमद्भागवते ३।२५।१२।

"तं त्वागताहं शरणं शरण्यं
स्वभृत्यसंसारतरोः कुठारम्"॥)

कुठारः, पुं, (कुण्ठ्यते छिद्यतेऽसौ। कुठ+कर्म्मणि आरन्।) वृक्षः। इति शब्दरत्नावली॥

कुठारुः, पुं, (कुठ+आरु।) वृक्षः। वानरः। इति मेदिनी॥ शस्त्रकारः। इति शब्दरत्नावली॥

कुठिः, पुं, (कुठ+"कुठिकंप्योर्नलोपश्च"। उणां ४।१४३। इति इन् किच्च।) पर्व्वतः। वृक्षः। इत्युणादिकोषः॥

कुठिकः, पुं, (कुठ+इकन् किच्च।) कुष्ठम्। इति हारावली। कुड् इति भाषा॥

कुठेरः, पुं, (कुण्ठति तापयति वैकल्यं करोति वा। कुठि खोटने वैकल्ये आलस्ये च+"पतिकठिकुठीति"। उणां १।५९। इति एरक् बाहुलकात् नुमोऽभावः।) अग्निः। इति शब्दमाला॥ तुलसी। इत्युणादिकोषः॥ अर्ज्जकः। इति राजनिर्घण्टः॥ वर्व्वरी इति ख्यातः। (यथा, रामायणे ३।१७।१०।

"दाड़िमान् करवीरांश्च अशोकांस्तिलकांस्तथा।
अङ्कोटांश्च कुठेरांश्च नीलाशोकांश्च सर्व्वशः"॥)

कुठेरकः,पुं, (कुठेर इव कायति प्रकाशते। कै+कः।) पर्णासः। इत्यमरः।२।४।७९॥ तुलसी इति ख्यातः। श्वेतच्छदः। इति शब्दचन्द्रिका॥ श्वेततुलसी वाबुइ तुलसी इति च ख्यातः। (अस्य पर्य्यायाः। "अर्ज्जकः श्वेतपर्णासो गन्धपत्रः कुठेरकः"। इति वैद्यकरत्नमालायाम्। वर्व्वरी। एतदर्थेऽस्य पर्य्याया यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।

"वर्व्वरी तुवरीतुङ्गी खरपुष्पाजगन्धिका।
पर्णासस्तत्र कृष्णे तु कठिञ्जरकुठेरकौ"॥

गुणाश्चास्य वर्व्वरीशब्दे ज्ञेयाः॥) नन्दीवृक्षः। इति राजनिर्घण्टः॥

कुठेरजः, पुं, (कुठेर इव जायते। जन्+डः।) कुठेरकः। श्वेततुलसी। इति शब्दरत्नावली॥

कुठेरुः, पुं, (कुठ+एरुक्।) चामरवातः। चामरेर वातास इति भाषा। तत्पर्य्यायः। मन्थवः २। इति त्रिकाण्डशेषः॥

कुड शि बाल्ये। अदने। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सकञ्च-सेट्।) एतदाद्याश्चत्वारः पञ्चमस्वरिणः। बाल्यमिह शिशुव्यापारः। शि कुड़ति अकुड़ीत् सिताभिः शिशुः। इति दुर्गादासः॥

कुड़ इ वैकल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्।) इ कर्म्मणि कुण्ड्यते। कुण्डति जनं देवः विकलं करोतीत्यर्थः। इति दुर्गादासः॥

कुड इ ङ दाहे। इति कविकल्पद्रुमः। (भ्वां-आत्मं-सकं-सेट्-इदित्।) इ कर्म्मणि कुण्ड्यते। ङ कुण्डते इति दुर्गादासः॥

कुड इ क रक्षे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्-इदित्।) इ क कुण्डयति। इति दुर्गादासः॥

कुड़पः, पुं, (कुड़+कपन्।) कुड़वपरिमाणम्। इत्यमरटीकायां स्वामी॥

कुड़वः, पुं, (कुण्डति परिमाति अनेनास्मिन् वा। कुड़+कवन्।) परिमाणविशेषः। (यथा, आर्य्यासप्तशत्याम्। १३०। "उपनीय कमलकुड़वं कथयति समयश्चिकित्सके ह्यलिकः"॥) स तु प्रस्थचतुर्थांशः। इति लीलावती॥ वैद्यकमते विप्रसृतपरिमाणम्। द्वात्रिंशत्तोलकमिति यावत्। तत्पर्य्यायः। अञ्जलिः २ अष्टमानम् ३ शरावार्द्धम् ४। इति परिभाषा॥ (यदुक्तं वैद्यकपरिभाषायाम्॥

"रक्तिकादिषु मानेषु यावन्न कुड़वो भवेत्।
शुष्कद्रवार्द्रयोश्चापि तुल्यमानं प्रकीर्त्तितम्"।
"प्रसृतिभ्यामञ्जलिः स्यात् कुड़वोऽर्द्धशरावकः।
अष्टमानश्च स ज्ञेयः"। इति शार्ङ्गधरस्य पूर्व्वखण्डे। १ अः॥)

कुड़ङ्गी, स्त्री, (कुड़ी क्षुद्रा ऊङ्गी कारवेल्ली।) क्षुद्रकारवेल्ली। इति राजनिर्घण्टः॥

कुड़िः, पुं, (कुण्ड्यते दह्यते इति। कुड़ि दाहे+इन्।) शरीरम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः।

कुड़िशः, पुं, (कुण्ड्यते भक्ष्यतेऽसौ। कुड़ अदने+बाहुलकात् शः तत इट्।) मत्स्यविशेषः। कुड़चि माछ इति भाषा। अस्य गुणाः। मधुरत्वम्। हृद्यत्वम्। कषायत्वम्। अग्निदीपनत्वम्। लघुत्वम्। स्निग्धत्वम्। वातरोगे पथ्यत्वम्। रोचनत्वम्। मलकोष्ठबन्धकारित्वञ्च। इति राजवल्लभः॥

कुड्मलः, पुं, (कुड़ बाल्ये+"वृषादिभ्यश्चित्"। उणां १।१०८। इति कलच् कुड़ेरपि। मुट् च।) कुड्मलः। इत्यमरटीका सिद्धान्तकौमुदी च॥

कुड्यं, क्ली, (कुड़ि+तत्र साधुरिति यत्। कौतेरश्म्यादित्वात् यक् डुगागमश्च इत्युज्ज्वलदत्तादयः।) भित्तिः। भित् देयाल इत्यादि भाषा। इत्यमरः। २।२।४॥ (यथा, महाभारते १।१४५।१०।

"सर्पिस्तैलवसाभिश्च लाक्षया चाप्यनल्पया।
मृत्तिकां मिश्रयित्वा त्वं लेपं कुड्येषु दापय"॥)

विलेपनम्। इति मेदिनी॥ कौतूहलम्। इति शब्दरत्नावली॥

कुड्यकं, क्ली, (कुड्य+स्वार्थे कन्।) कुड्यम्। भित्तिः। इति शब्दरत्नावली॥

कुड्यच्छेदी, [न्] पुं, (कुड्यं भित्तिं छिनत्ति विदारयतीति। कुड्य+छिद्+णिनिः।) चौरविशेषः। इति शब्दरत्नावली॥ सिँदेल चोर इति भाषा॥

कुड्यच्छेद्यं, क्ली, (कुड्यस्थितं कुड्यस्य वा छेद्यम्।) खानिकम्। इति त्रिकाण्डशेषः। देयालेर गर्त्त इति भाषा॥

कुड्यमत्सी, स्त्री, (कुड्ये मत्सी इव। मत्स्य+जातित्वात् ङीष् यलोपः।) गृहगोधिका। इति शब्दरत्नावली॥

कुड्यमत्स्यः, पुं, (कुड्ये मत्स्य इव।) गृहगोधिका। इति हेमचन्द्रः॥

कुण त् क आभाषे। मन्त्रे। इति कविकल्पद्रुमः॥ (अदन्त-चुरां-परं-सकं-सेट्।) क्षणो मूर्द्धन्योपधः। कुणयति। मन्त्रोऽभिमुखीकरणम्। गुणोक्तिरित्यन्ये। इति दुर्गादासः॥

कुण श उपकरणे। शब्दे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) उपकरणं दानादिना पोषणम्। श कुणति दीनं दयालुः। कोकिला। इति दुर्गादासः॥

कुणञ्जरः, पुं, (कुणं मुखशब्दादिकं जरयति। कुण+जृ+बाहुलकात् खच्।) वृक्षविशेषः। वनवेतुया इति भाषा। तत्पर्य्यायः। कुणञ्जा २ हलञ्जः ३ अरण्यवास्तूकः ४। अस्य गुणाः। मधुरत्वम्। रुचिकारित्वम्। दीपनत्वम्। पाचनत्वम्। हितत्वञ्च। एतच्छाकगुणाः। त्रिदोषनाशित्वम्। मधुरत्वम्। रुचिकारित्वम्। दीपनत्वम्। ईषल्लवणत्वम्। संग्राहित्वम्। पित्तश्लेष्महरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥

कुणपः, पुं, (कणेः+कपन् सम्प्रसारणञ्च।) शवम्। मृतशरीरम्। इत्यमरः। २।८।११८॥ (यथा, महाभारते १४।६।२२-२३।

नारद उवाच।

"उन्मत्तवेशं बिभ्रत् स चंक्रमीति यथासुखम्।
वाराणस्यां महाराज! दर्शनेप्सुर्महेश्वरम्॥